d by eGangotri/Sarayu Trust. Funding IKS-MoE-Grant-2 Equipment Heritage Foundation,



# No. 37

## Inscription on a Vishṇu image from Deopani[1].
## ( The 9th Century A. D. )

हर-पार्वतौ—

भवं त्रिलोच्यं उरगेन्द्रसूत्रं
वृषध्वजं सोमजगत् प्रकाशम् ।
म—U— —UU—U शूर्ज्जं
सत्वस्तु देवी भुवि मर्त्यलोके ॥[2]

# No. 38

## Puri Plate of Kulastambha[3].
## ( Śulki dynasty )
## ( *Circa* 9th Century A. D )

गिरीश—

जयति सुरासुर विद्वद्-
विद्याधरमुकुटघृष्टचरणाम्बुजः ।
शशिमणि मयूखभासित-
पिङ्गजटाभारभासुरो गिरीश ॥[4]

---

1. Ed. by Dr. K. N. Dikshit in *E. I.* XVIII, P. 330. The inscription belongs to the 9th century A. D. on palaeographical grounds.
2. The verse is neither well deciphered by the editor nor it is clear and readable.
3. Ed. by Dr. D. C. Sircar in *E. I.* XXIX, P. 167. The inscription belongs to about the 9th Century A. D.
4. For the same verse with some modifications please see No. 43.

CC-0. In Public Domain Sri Aurobindo Library, Pondicherry

tized by eGangotri/Sarayu Trust. Funding IKS-MoE-Grant-2 Equipment Heritage Foundation, Jalg



## No. 39

### Talcher grant of Kulastambha[1].

शिव—

ॐ स्वस्ति जयति भुजगभोगप्रमाणव: ।
सर्वाङ्गसर्वक्कद्व्यापीहरपादाब्जरेणव: ॥

## No. 40

### Grant of Nandivarmā – Pallavamalla[2].

सदाशिव—

सुमेरुगिरिमूर्द्धनि प्रवरयोगबद्धासनं
जगत्त्रयविभूतये रविशशाङ्कनेत्रद्वय-
मुमासहितमादरादुदयचन्द्र लक्ष्मीप्रदं
सदाशिवमहन्नमामि शिरसा जटाधारिणम् ॥

---

1. Ed. by R. D. Banerji in *E.I.* XII, P. 157 The inscription belongs to the 9th Century A. D. on palaeographical grounds.

2. Ed. by Rev. Thomas Foulkes, Bangalore in *I A.* Vol. VIII, P. 274. The inscription is assigned to the 9th Century A. D.

CC-0. In Public Domain Sri Aurobindo Library, Pondicherry

l by eGangotri/Sarayu Trust. Funding IKS-MoE-Grant-2 Equipment Heritage Foundation,



# No. 41

## Howraghat Plates of Balavarman II of Kāmarūpa[1].

शिव—

भवतु भवतिमिरभिदुरं तेजो रौद्रं प्रशान्तये जगतः।
परिवर्त्तते समग्रं कल्पान्तनिशावसाने यत्॥

# No. 42

## Angul Plate of Śāntikaradeva[2].

महेश—

नाड़ीचक्रोदरस्थ क्षिति-जल-दहनस्पर्शनाकाशधामो
सर्वात्मा सर्वशक्तिः शशि-तरणिगतिर्विश्वमूर्त्तिः पुराणः।
योऽसौ देवातिदेवो विचरति भगवान् देहिनां देहमध्ये
आद्योहंसाभिधानो स जयति जगतां प्राणभूतो महेशः॥

---

1. Ed. by Dr. D. C. Sircar, Ootacamund in *E. I.* XXXII, P. 288. The inscription is assigned to the end of the 9th Century A. D. Nangaon Plates of Balavarman of Kāmarūpa (The Kāmarūpa Sāsanāvalī, P. 73.)

2. Ed. by Sri Anirudha Das, I.A.S., in *O.H.R J.*, Vol. XIII, No. 1. The inscription is attributed to the first part of the 9th Century A. D.

CC-0. In Public Domain Sri Aurobindo Library, Pondicherry

tized by eGangotri/Sarayu Trust. Funding IKS-MoE-Grant-2 Equipment Heritage Foundation, Jalg



## No. 43

### Hindol Plate of Kulastambha[1].

( C 9th Century A. D. )

शिव—

जयति सुरासुरसिद्धविद्याधरमौलिघृष्टचरणाब्जः ।
शशिमणि मयूखभासितपिङ्गजटाभासुरो गिरीशः ॥[2]

## No. 44

### Rāshṭrakūṭa Charter from Chinchani[3].

अर्द्धनारीश्वर—

गिरिसुताहरयोरविभिन्नतया-
र्विहरतोर्न्नियमार्थमवन्तु वः ।
सरसयावकभस्मविचित्रिता-
त्रिपथगापुलिने पदपङ्क्तयः ॥
शूलभिन्नस्य . विन्यस्तो वश्चुलुकापीतवारिधिः ।
दक्षिणाशामुखोत्तुङ्गभूभृत्पालितशासनः ॥

---

1. Ed. by Dr. D. C. Sircar, Ootacamund, in *E. I.* XXVIII, P. 112. The inscription is assigned to the last part of the 9th Century A. D.

2. The same verse is given in No. 39 above in a slightly modified form.

3. Ed. by Dr. D, C. Sircar in *E.I.* XXXII, P. 51. The date of the inscription is Saka 848 (A. D. 926).

CC-0. In Public Domain Sri Aurobindo Library, Pondicherry

l by eGangotri/Sarayu Trust. Funding IKS-MoE-Grant-2 Equipment Heritage Foundation,



# No. 45

## Andura Plates of Govinda IV[1].

## ( A. D. 929 )

शम्भु—

शम्भोर्यानि शिरःस्थितस्य फणिना पत्युर्मणीनां दिशा
द्योतन्ते परितः शतानि समणि ज्योतींषि जूटाटवीम् ।
एतस्तान्यु परिस्रवत्सुरसरित्सिक्तेन्दुकन्दोल्लस-
ज्ज्योत्स्नाकल्पलतालवालवलयश्रीभांजि भजतु वः ॥[2]

# No. 46

## Deoli Plates of Krisnā III[3].

## ( Rāṣṭrakūta )

## ( A. D. 940 )

त्रिपुरान्तक (शिव)—

जयति च गिरिजाकपोलबिम्बा-
दधिगतपत्रविचित्रितांसभित्तिः ।
त्रिपुरविजयिनः प्रियोपरोधा-
द्धृतमदनाभयदानशासनेव ॥

1. Ed. by Dr. V. V. Mirashi in *E. I.* XXXVI, P. 267. The inscription is dated in Saka year 851 (A. D. 929).

2. This is the third verse, invoked for Sambhu, the first and second being for Brahmā and Keśava respectively (See Vol. I, Pt. i, No, 21, P. 12 above)

3. Ed. by Dr. G. R. Bhandarkar in *E. I.* V, P. 192. The date of the inscription is Saka year 862 (A. D. 940)

CC-0. In Public Domain Sri Aurobindo Library, Pondicherry

tized by eGangotri/Sarayu Trust. Funding IKS-MoE-Grant-2 Equipment Heritage Foundation, Jalg



## No. 47

### Gorakhpur Copper-plate Grant of Jayāditya of Vijayapura[1].

शिव —

क्षित्यादिजयमानान्तमूर्त्तये विश्वगात्मने ।
मुनीनां ध्यानगम्याय समस्तव्यापिने नमः ॥

## No. 48

### A Grant of Dharaṇīvarāha of Vadhavā[2].
### ( C 10th Century A. D. )

धन्धेश्वर (शिव) —

पुण्यं व्योमसरिज्जलेन वहता चन्द्रांशुभिः शीतलं
सत्पुष्पं कनकारविन्दनिचयो निर्व्वाणसपनफलम् ।
व्यालालीविषकन्दलीमृगपतिप्रांतं न संतापदं
श्रीधन्धेश्वरमूर्भ्रि सुखदं वस्ताज्जटाकाननम ॥

---

1. Ed. by Dr. F. Kielhorn in *I.A.*, Vol XXI, P.170. The date of this inscription is not known. But, palaeographically it is assigned to the beginning of the 10th Century A.D.

There are three more verses invoked after this which relate to Brahmā, Viṣṇu and Pārvati in order.

(Please see Vol. I, Pt i, No. 22, P. 12. Vol. II, Pt. ii. No. 11 and Vol. III, Pt. iii, No. 3)

2. Ed. by Dr. G. Buhler in *I. A.* Vol. XII, P. 193. The inscription belongs to the beginning of the 10th Century A. D.

CC-0. In Public Domain Sri Aurobindo Library, Pondicherry

l by eGangotri/Sarayu Trust. Funding IKS-MoE-Grant-2 Equipment Heritage Foundation,



# No. 49

## Bhaturiya Inscription of Rājyapāla[1].
## ( East Bengal )
## ( C 10th Century A. D. )

नटराज शिव—

वेल्लद्दोर्दण्डवेगानिलविहतमहादमाधरोत्तुङ्गशृङ्ग-
ग्रावभ्रंशोपजातध्वनिचकितचलद्दिग्गजोन्मुक्तनादम् ।
पादन्यासान्निमज्जद्धरणितलभरा भुग्नभोगीन्द्रभोग-
न्नृत्तं वः पातु शम्भोर्म्मुकुटशशिकलालिङ्गितव्योमचन्द्रम् ॥

# No. 50

## Gudimallam Plates of the Bāṇa King Vikramāditya II[2].

ॐ नमश्शिवाय स्वस्ति ॥

शिव—

जयति स सर्व्वव्यापी यत्कृतपरिणद्धकन्धरामध्ये ।
गलभूषणाहिभोगप्रतिबिम्बमिव सुरदहनविषम् ॥१॥
जयति हुताशनविद्युद्विद्रुमसंघातनिभजटाभारः ।
यच्छिरसि मणिजटाभारक्तसरित्पद्ममालेव ॥२॥

---

1. Ed. by Dr. D. C. Sircar, Ootacamund in *E. I.* XXXIII, P. 153. The inscription is assigned to the first half of the 10th Century A. D.

2. Ed. by Dr. E. Hultzsch in *E. I.* XVII, P. 4. The inscription belongs to about the middle of the 10th Century A. D.

CC-0. In Public Domain Sri Aurobindo Library, Pondicherry

tized by eGangotri/Sarayu Trust. Funding IKS-MoE-Grant-2 Equipment Heritage Foundation, Jalg



जयति प्रणवस्यार्द्धो लेखामात्रशिखाशशी यस्य ।
दहनदहनखिन्नविषधरवनानलदग्ध इव लक्ष्यः ॥३॥

जयत्यवधरसंकाशकन्धरश्चाहिकुण्डलम् ।
ललाटेक्षणमाकाशसरिन्मालाधरं वपुः ॥४॥

रुद्र :— जयति वृषेशो देवो ललाटनयनाग्निनिपतितानङ्गः ।
असुरपुरारि रुद्रो जगदुदयलयंकरो भीमः ॥५॥

जयति सनादात्थोसौ शक्त्यर्द्ध गुणाकरो विभुश्शम्भुः ।
संवृतमन्त्रार्था शद्वाद्यै र्गुणैरनुपलभ्यः ॥६॥

जयति जटाधरमौलिर्म्मन्दाकिनीपूरितमहामकुटेशः ।
गिरितनयार्प्पितभागो गुणगणरहितो विभुर्व्यापी ॥७॥

नमश्शिवाय स्वस्ति श्री ॥

जयति स कामाङ्ग-दहनो मस्तकन्यस्तमुग्धेन्दुः ।
कादितृणान्तस्येशो यो गुप्त्युत्पत्तिलयहेतुः ॥८॥[3]

3. The learned editor remarks that the metre seems incorrect.

CC-0. In Public Domain Sri Aurobindo Library, Pondicherry

l by eGangotri/Sarayu Trust. Funding IKS-MoE-Grant-2 Equipment Heritage Foundation,



# No. 51

## Chandrehe Inscription of Prabodhaśiva.*

( A. D. 972 )

ॐ नमः शिवाय ॥

शर्व्वः (शिव)—

फणिश्वासश्यामे स्वनदमरनद्यम्भसि च य-
ज्जटाजूटाम्भोजे नयनशिखिविद्युद्विलसति ।
तथा चूड़ाचन्द्रद्युतिनिकरधारेव ककुभं
कपालानां माला तुलयति स शर्व्वो विजयते ॥१॥

हसश्रेणीहसितमहसां संहतिश्शङ्करस्य
स्फारीभूता वदनमभितो नागचर्म्मावृतस्य ।
किञ्चित्कण्ठच्छविकलुषिता मेघनिर्यन्मृगाङ्क-
च्छायां स्वच्छां सपदि दधती सम्पदं वो ददातु ॥२॥

नटराज शिव—

चारी-संचरणप्रवीणचरणव्यापारणाघूर्णित-
क्षोणीकुण्डनमत्फणीश्वरफणं विद्राणदिग्वारणम् ।
दोर्द्दण्डभ्रमणादकाण्डचलितब्रह्माण्डखण्डं मुदे
भूयाद्वो निविड़क्वणड्डमरुकं चण्डीपतेस्ताण्डवम् ॥३॥

---

* Ed, by R. D, Banerji, in *E.I.* XXI, P. 149. The date of the inscription is Kālachuri Samvat 727 (A. D. 972).

CC-0. In Public Domain Sri Aurobindo Library, Pondicherry

# No. 52

## A Stone Inscription from Ranod ( Narod) ( Gwalior )[1] ( A. D. 972 )

शम्भू नटराज-धूर्जटी-त्रिपुरविजयी—

संपूर्णाङ्गमशेषकल्मषमुषः सम्पन्नमप्यादरा-
द्दूरं पादतलावघट्टननमत्कैलासनश्यत्स्थिति ।
सानन्दं युगपत्सुरासुरसभा संरम्भदत्तव्यथं
शम्भोर्ल्लास्यपरिग्रहस्य दिशतु श्रेयांसि वः स्थानकम् ॥१॥

चरणभरावनतावनिविनिमत्कमठोरु कर्प्पराभोगा ।
नाट्यस्य धूर्ज्जटेर्धूरि वर्णपरिष्वष्करणी जयति ।२॥

उत्क्षिप्तो दण्डपादो ग्रहगणमुडुभिः सार्द्धमुत्तम्य भूयः
प्रायाद्यावत्स्वसीमामपरपदभरभ्रष्टपृष्ठा क्क भूमिः ।
ईत्थं दौस्थेपि रङ्गे गगनतलचलच्चारिकाचारवृत्ते-[
स्त्रायंतां वस्त्रिसन्ध्यं त्रिपुरविजयिनस्ताण्डवक्रीड़ितानि ॥३॥[2]

---

1. Ed. by Dr. F. Kielhorn in *E. I.* I, PP. 354-355. The date is A. D. 97?.

2. The inscription begins with two more verses, invoking Gaṇeśa and Sarasvatī (See Vol. II, Pt. iii, No, 3)

tized by eGangotri/Sarayu Trust. Funding IKS-MoE-Grant-2 Equipment Heritage Foundation, Jalg

CC-0. In Public Domain Sri Aurobindo Library, Pondicherry

d by eGangotri/Sarayu Trust. Funding IKS-MoE-Grant-2 Equipment Heritage Foundation,



# No. 53

## Gaonri Plates of Vākpati Mūñja[1].
## ( A. D. 986 )

नीलकण्ठ—

याः स्फूर्ज्जत्फलभृद्विषानलमिलद्धूम्रप्रभाः प्रोल्लसन्-
मूर्द्धाबद्धशशाङ्ककोटिघटिता याः सैंहिकेयोपमाः ।
याश्चञ्चद्गिरिजाकपोललुलिताः कस्तूरिकाविभ्रमा-
स्ताः श्रीकण्ठकठोरकण्ठरुचयः श्रेयांसि पुष्णन्तु वः ॥[2]

---

1. Ed. by Dr. K. N. Dikshit, Simla, in *E. I.* XXIII, P. 108 f. The date of the inscription is V. S. 1038 (A. D. 981).

2. The same verse is also given in other sets of copper plates of Vākpati Muñja dated in V. S. 1043 (A. D. 986) (*E. I.* XXIII, PP. 111-112)

Malwā Inscription of Vākpati (*I. A.* Vol. VI, P. 51) A Copper-plate grant of Vākpatirāja of Dhārā (*I. A.* Vol. XIV, P. 160) The next verse invokes Rādhāvallabha (Srikriṣṇa) (See Vol, I, Pt. iii, No. 59, P, 136 above)

CC-0. In Public Domain Sri Aurobindo Library, Pondicherry

tized by eGangotri/Sarayu Trust. Funding IKS-MoE-Grant-2 Equipment Heritage Foundation, Jalg



## No 54

( A. D. 987 )[1]

हरि-हर—

पातां गो गरुड़ध्वजो हरहरी-
शुक्लासिताङ्गावजौ
शूलारिप्रहताहितौ त्रिभुवन-
स्योच्छेदरक्षाकरौ ।
शश्वद्भस्मपरार्ध्यकुङ्कुमरुची
दिक पीतवस्त्राम्बरौ
संयत्यन्धकभौमदर्पदलनौ
युष्मानुमाम पती ॥[2]

---

1. Ed. by Dr. B Ch. Chhabra, New Delhi, in *E. I.* XXXIV, P. 81. The date of the epigraph is V. S 1043 (A. D. 987).

2. In this inscription another verse invoking Mu rāri (Viṣṇu) is given (See Vol I, Pt. i, No. 27, P. 15)

In the *Līlāvatīprakāśa*, a commentary on the Līlāvatī of Vallabha Achārya, by Vardhamāna, we get the following verse expressing the 'Hari-Hara' cult, which seems to have been popular since the 10th century A.D. :—

CC-0. In Public Domain Sri Aurobindo Library, Pondicherry

l by eGangotri/Sarayu Trust. Funding IKS-MoE-Grant-2 Equipment Heritage Foundation,



# No. 55

## Ghumli Plates of Bashkaladeva*.

## ( A. D. 989 )

शिव—

योऽभ्युदयश्च पान्तु वो
व्योमकेशस्य जटाबन्धेन्दुरश्मयः ।
भान्ति ये शैलजाकण्ठे
मालतीमालिका इव ॥

---

एकत्र शूलमपरत्र विषप्रसून-
मन्यत्र कीर्त्तिरपरत्र च पीतवासः ।
तत्पातु वर्म्मंशशलक्ष्मकलाकिरीट-
निष्पिष्टकैटभहृदोर्मम वान्छितानि ॥

(Vide *Notices of Sanskrit MSS.*, by Rajandralal Mitra, Vol. III, Pt ii, P. 173 (1875)

* Ed. by Dr. D. C. Sircar, in *E. I.* XXXI, P. 14. The inscription is dated in V. S. 1045 (A.D, 989)

CC-0. In Public Domain Sri Aurobindo Library, Pondicherry

tized by eGangotri/Sarayu Trust. Funding IKS-MoE-Grant-2 Equipment Heritage Foundation, Jalg



# No. 56

## Dewal Praśasti of Lalla, the Chhinda*.

( A. D. 992 )

ॐ नमः शिवाय ॥

शिव—

हेलाङ्गुष्ठाग्रपीड़ाभरनमदचलोत्संगसम्भारदूर
भ्रश्यद्भूभारतिर्यग्दलितमणिफणामण्डले भोगिराजे।
तत्कालोद्भ्रान्तलोकत्रितयकृतमहास्तोत्रमन्त्रावतारः
पायाद्वः पार्व्वतीशः शमितदशशिरःशौर्यवीर्यावलेपः ॥
शूलक्षतद्विरददानवकुम्भमुक्त-
मुक्ताकलापकलितामलकण्ठकान्तिः।
विश्वं पुनातु गिरिजा वदनावधूत-
चन्द्रोपनीतपरिवेष मिवोद्वहन्ती ॥

---

* Ed. by Dr. G. Buhler in *E. I.* I, P. 77.
The date of the inscription is A. D. 992.

CC-0. In Public Domain Sri Aurobindo Library, Pondicherry

d by eGangotri/Sarayu Trust. Funding IKS-MoE-Grant-2 Equipment Heritage Foundation,



# No. 57

## Maser Inscription of Sulki Chief.[1]
## ( C 10th Century A. D. )

नमः शम्भवे ॥

शिव—

दृष्ट्वा कण्ठे सुरत्नां मदनफलयुतां भूतविद्रावणाख्यम्
पाणौ वद्धां प्रियाया विपधरदमना—U——U—— ।
कृत्यं नीहारपत्न्याः सकलमिदमिति प्रत्यजन् पन्नगादिन्
गौरीवक्त्राम्बुजालिः प्रकिरतु दुरितं चन्द्रशीर्षो भवो वः ॥[2]

---

1. Ed. by M. Venkataramayyā, Ootacamund, in *E.I.* XXIX, P. 27. The inscription is attributed to the 10th century A. D.

2. The other verses of this epigraph invoke Mātrikā and Pārvatī (See Vol, II, Pt ii, No. 12)

CC-0. In Public Domain Sri Aurobindo Library, Pondicherry

tized by eGangotri/Sarayu Trust. Funding IKS-MoE-Grant-2 Equipment Heritage Foundation, Jalg



# No. 58

## Pettasara Grant of Neṭṭabhañja[1].
## ( *Circa* the 10th Century A. D. )

शिव—

जयतु[2] कुसुमबाणप्राणविक्षोभदक्षम्
स्वकिरणपरिवेषौर्जित्यजीर्णोन्दुलेखम् ।
त्रिभुवनभुवनान्तर्द्योतभास्वत्प्रदीपम्
कनक निकषगौरं चारुनेत्रं हरस्य ॥१॥

शेषाहेरिव ये फणाः प्रविलसन्त्युद्भास्वरेन्दुत्विषः
प्रालेयाचलशृङ्गकोटय इव त्वङ्शन्ति येत्युन्नताः ।
नृत्ताटोपविघट्टिता इव भुजा राजन्ति ये शाम्भवा–
स्ते सर्व्वाघविघातिनः सुरसरित्तोयोर्म्मयः पान्तु वः ॥२॥

1. Ed. by C. C. Das Gupta, Calcutta, in *E. I.* XXVII, P. 338.

2. In some inscriptions *Jayati* is used. The same verses are mentioned in the following grants of the Bhañja Kings of Orissa :—

(1) Dasapalla Plates of Satṛbhañja (*E. I.* XXIX, P. 192)
(2) Jangalpadu Plates of Shatṛbhañja (*E.I.* XXX, P. 253)
(3) Orissa Plates of Vidyādharabhañja (*E. I.* IX, P. 275)
(4) Ganjam Plates of Netṛibhañjadeva (*E. I.* XVIII, PP. 293-295)
(5) Ganjam Plates of Vidyādharabhañjadeva (*E.I.* XVIII, P. 296)
(6) Komanda Copper-plate of Neṭṭabhañja (*E. I.* XXIV, P. 174)

CC-0. In Public Domain Sri Aurobindo Library, Pondicherry

d by eGangotri/Sarayu Trust. Funding IKS-MoE-Grant-2 Equipment Heritage Foundation,



# No. 59

## Anbil Plates of Sundara-Chola[3].
## ( *Circa* the 10th Century A. D. )

नटराज (शिव)—

ये वेगाकृष्ट–विश्वाचलवलयमहागह्वरोद्यन्निनाद–
व्याभीताशेषदेवासुरपरिकलिताकाण्डसंहारशंकाः ।
आशाचक्रावसानावधिपरिविसृतास्ताण्डवव्यापृतास्ते
वाहादण्डाश्चिरं वो विदधतु महतींभूतिमर्धेन्दुमौलेः ॥[4]

---

(7) Two grants of Bhañja Kings of Vañjulvaka (*E. I.* XXVIII, PP. 276-281)

(8) Daspalla Plates of Neṭṭabhañja (*J. B. O. R. S.* Vol. VI, P. 276)

(9) Tekkali Plates of Satrubhañja (*J. B. O. R. S.* Vol. XVIII, P. 381–389)

(10) Gumusur Plates of Neṭribhañjadeva (*Arch. Sur. Mayurbhanja* Vol. I, P. 146)

(11) C. P.Grant of Vidyādharabhañja (*Ibid* P. 149)

3. Ed, by J. A. Gopinatha Rao, in *E. I.* XV, PP. 58-59. The inscription is assigned to the 10th century A. D. on palaeographical consideration.

4. The first two verses of this epigraph invoke Hari (See Vol. I, Pt. i, No. 28, P. 45 above)

CC-0. In Public Domain Sri Aurobindo Library, Pondicherry

tized by eGangotri/Sarayu Trust. Funding IKS-MoE-Grant-2 Equipment Heritage Foundation, Jalg



# No. 60

## Grants of Gayāḍa Tuṅga[1].
## ( *Circa* the 10th Century A. D. )

शिव—

> विशुद्धज्ञानदेहाय त्रिवेदिदिव्यचक्षुषे।
> श्रेयःप्राप्तिनिमित्ताय नमः सोमार्द्धधारिणे ।[2]

---

1. Ed. by Dr. D. C. Sircar, Ootacamund, in *E. I.* XXXIV, P. 95. The inscription belongs to the 10th century A. D. on palaeographical grounds.

   The same verse is found in the following inscription—

   Phulasara Copper-plate grant of the Gaṅga Kīrttirājadeva, edited by Satyanarayana Rajaguru (the author) in *JAHRS*. Vol. III, Pt. i, P.39.

2. It is curious to note here that the same verse is used as *Maṅgalācaraṇa* in the *Ślokavārtika* by the great Mīmāmsist, Bhaṭṭa Kumārila (8th century A. D.) and also in the *Devīmāhātmyam*. (See *I. H. Q.* Vol. I, PP. 759_760). According to N. Aiyaswami, this verse belongs to a period before Kumārila Bhaṭṭa as it was known to Gauḍapāda. But, Mr. Aiyaswami did not refer to the inscription of Gayāḍa Tuṅga.

CC-0. In Public Domain Sri Aurobindo Library, Pondicherry

d by eGangotri/Sarayu Trust. Funding IKS-MoE-Grant-2 Equipment Heritage Foundation,



# No. 61

## Tandikonda Grant of Ammarāja II[1].
### ( *Circa* the 10th Century A. D. )

शिव—

श्रीवागीशकराब्जानां स्वपादनखचन्द्रमाः ।
देयात्शिवस्स्वयं शं वः क्रियाकार्यं हि कारणम् ॥

# No. 62

## The Gauri Inscription of Pravodhaśiva[2].
### ( *Circa* the 10th Century A. D. )

ॐ नमः शिवाय ॥

शिव—

लाङ्कावीरेन्द्रवाहूव्यतिकरचटुलस्फाटिकाद्रीन्द्रकोटि-
श्रेणिसंघट्टविभ्यद्गगनचरवरच्छत्रदिक्चक्रवालम् ।
————U—ला जगदकृत तदाक्रन्दनिर्ह्रादघोर-
स्वच्छन्दः सोद्रिवासी मुदमुपचिनुताच्चन्द्रचूडामणिर्व्वः ॥

नन्दिन्केयं प्रविष्टा पशुपति UU——Uदेवीति मन्ये
मिथ्यैतन्नास्य सान्याUUUUUU——U——U—शा
मुग्धे त्वद्रूपधारी त्रिदशरिपुरसौ दृश्यतां पातितोग्रे
केनास्त्रेणेति देव्या कटुवचनजितः पातु मौनी शिवो वः ॥

---

1. Ed. by Bhavaraj V. Krishnarao, Rajahmundry, in *E. I.* XXIII, P. 166. The inscription belongs to the 10th century A. D.

2 Ed, by R. D. Banerji in *E. I.* XXII, PP. 129 130. The inscription belongs to about the 10th century A. D.

CC-0. In Public Domain Sri Aurobindo Library, Pondicherry

tized by eGangotri/Sarayu Trust. Funding IKS-MoE-Grant-2 Equipment Heritage Foundation, Jalg



# No. 63

Grant of Raṇastambhadeva.*
( Orissa, Śulki dynasty )
( *Circa* the 10th Century A. D. )

गिरीश—

जयत्यसुरसिद्धविद्याधरमुकुटघृष्टचरणाब्जः ।
शशिमणिमयूखभासितपिङ्गजटाभास्वरो गिरीशः ॥

---

* Ed. by Mahāmahopādhyāya Haraprasad Shastri in *J. B. O. R. S.*, Vol. IV, P. 169. The inscription is not dated. But, we presume that Raṇastambha, the donor of this grant belongs to the 10th century A. D. from palaeographical consideration.

CC-0. In Public Domain Sri Aurobindo Library, Pondicherry

l by eGangotri/Sarayu Trust. Funding IKS-MoE-Grant-2 Equipment Heritage Foundation,



# No. 64

## Bilhari Stone Inscription of the Rulers of Chedi.*

( The 10th Century A. D. )

ॐ नमः शिवाय ॥

शम्भु—

पायाद्वः स समस्तमङ्गलनिधिः शम्भोर्जटाजूटको
यस्मिँल्लोललसद्युमण्डलगलन्मन्दाकिनीवारिभिः।
गाढ़ग्रन्थिनिपीडितोरगपतिप्रस्फारपुंल्लत्फणा-
भीमव्यावृतवल्कमारुतधृतैः श्वेतातपत्रायितम् ॥१॥

अपि च ॥

अव्याद्वश्चन्द्रचूड़स्य लोचनार्चिष्मतः शिखा।
मित्रमेष स्मरस्येति दग्धुं विधुमिवोद्गता ॥२॥

यं खेलाय षड़ाननः शिशुतया कृत्वा ग्रहं मार्गति
ग्रन्थो यश्च दुरोदरैः पुरभिदो देव्या समं दीव्यतः।
केलीकोपकथासु येन तनुते हेतिक्रियां पार्व्वती
पायाद्वः स जटावनैककुसुमं शार्व्वः सुधादीधितिः ॥३॥

दिक्षु प्रेंखाभियोगप्रवलितवलनाविभ्रमाकाण्डचण्डै-
र्दोर्दण्डानां प्रकामप्रथिमभरनिलैर्दूरमुत्सारितासु।
किंच प्रस्फारचारीनमदवनिवशाद्देव्यामि याते महत्ता-
मव्यादव्याहतेच्छं त्रिपुरविजयिनस्ताण्डवाड़म्बरम्वः ॥४॥

* Ed. by Dr. F. Kielhorn in *E. I.* I, P. 254. The date of the inscription is about the end of the 10th century A.D.

CC-0. In Public Domain Sri Aurobindo Library, Pondicherry

tized by eGangotri/Sarayu Trust. Funding IKS-MoE-Grant-2 Equipment Heritage Foundation, Jalg



# No. 65

## Copperplate Grant of Silāhāra Chhadvaidēva.[1]

### ( The 10th Century A. D. )

हरि-हर—

श्रीव्वर्द्धतां नवोद्यानराजीवायतनेत्तृया[2] ।
शिवः सहोमया चास्तां राजीवायतनेत्तृया ॥१॥

स वोव्याद्वेधसा धाम यन्नाभिकमलं कृतम् ।
हरश्च यस्य कान्तेन्दुकलया कमलंकृतम्[3] ॥२॥

---

1. Ed. by Prof. V. V. Mirashi in *E. I.* XXVI, P. 288. The inscription belongs to about the last part of the 10th century A. D.

2. The learned editor, Prof. Mirashi, suggests that the expression means, 'who resorts to (Vishnu) whose eyes are long like a fresh garden-lotus.'

3. The second verse is given in :—
   (1) Radhanpur plates of Govinda III (Rāṣṭrakūta) of Saka 730 (A. D. 808) (*E. I.* VI, P. 242)
   (2) Plates of Dantivarman of Gujarat of Saka 789 (A, D. 867) (*E.I.* VI, P. 287)
   (3) Cambay plates of Govinda IV of Saka 852 (A.D. 930) (*E.I.* VII, P. 36)
   (4) Sirur inscription of the time of Amoghavarsha I (A.D. 866) (*E.I.* VII, P. 205)
   (5) Dhuliya plates of Karkarāja (8th century A. D. ?) (*E.I.* VIII, P. 184)
   (6) Two grants of Indrarāja (*E.I.* IX, PP. 29 and 33)
   (7) Paithan plates of Govinda III (A.D, 794) (*E.I.* III, P. 105)

CC-0. In Public Domain Sri Aurobindo Library, Pondicherry

l by eGangotri/Sarayu Trust. Funding IKS-MoE-Grant-2 Equipment Heritage Foundation,



(8) Bhadana grant of Aparajita (A.D. 997) (*E.I.* III, P. 271)
(9) Rāshṭrakuta grant of Krishnā II (A. D. 910)
(*E.I.* I, P, 53)
(10) Talegaon Copper-plates of Krishnarāja I (A.D. 768)
(*E.I.* XIII, P. 279)
(11) Bhandak plates of Krishnarāja (A.D. 772)
(*E.I.* XIV, P. 123)
(12) Sanjan plates of Amoghavarsha I (A,D. 871)
(*E.I.* XVIII, P. 243)
(13) Surat plates of Karkkarāja Suvarnavarsha (S. 743)
(*E.I.* XXI, P. 140)
(14) New Copper-plate of Dhruva II (Gujarat Rashṭrakuṭa)
(*E.I.* XXII, P. 71)
(15) Brahmanapalli grant of Karkka (S. 746)
(*E.I.* XXII, P, 80)
(16) Jethwai plates of the Rāshṭrakuṭa Queen Silamahādevī
(*E.I.* XXII, P. 105)
(17) Bhor Museum Copper-plates of Dhruva Dhārāvarsha
(*E.I.* XXII, P. 182)
(18) Anjanavati plates of Govinda III (*E.I.* XXIII, P. 13)
(19) Sīsavai grant of Govinda III (S. 729)
(*E.I* XXIII, PP, 204-218)
(20) Pimpari plates of Dhārāvarsha-Dhinvarāja
(*E I.* X, P. 85)
(21) Javakheda plates of Amoghavarsha I (S. 742)
(*E.I.* XXXII, P. 130)
(22) Jharika grant of Rāshṭrakuṭa Govinda III (S. 725)
(*E.I.* XXXII, P. 160)
(23) Nesarika grant of Govinda III (S. 727)
(*E. I.* XXXIV, P. 128)
(24) Inscription from Kāvi (*I.A.* Vol. V, P. 145)
(25) Grant of Govinda III (*I.A.* Vol. VI, P. 65)
(26) Sanskrit and old Canarese Inscription (*I.A* Vol. XI,
PP. 111 & 157)
(27) Sanskrit and old Canarese Inscription (*I.A.* Vol. XII,
PP, 158, 181 and 218)
(28) Do Do

CC-0. In Public Domain Sri Aurobindo Library, Pondicherry

tized by eGangotri/Sarayu Trust. Funding IKS-MoE-Grant-2 Equipment Heritage Foundation, Jalg



# No. 66

## Samgamner Copper-plate Inscription.*

## ( A. D. 1000 )

ॐ नमः शिवाय ।।

चन्द्रशेखर :—

त्रयमपि भुवनानामीषुदुन्मेषमात्रात्–
प्रभवति लयशेषं यन्निमेषादुपैति ।
अतिशयितचरित्रो योगिनामप्यगम्यः
स ईह जयतु देवः चारुचन्द्राङ्कमौलिः ।।१।।

भुवनभवनहेतुः दुष्कृताम्भोधिसेतुः-
विहितमदनमाथः पार्व्वतीप्राणनाथः ।
निहतमरुदरीशः पातु भिल्लममीशः**
करतलकृतशूलः सर्व्वदा चन्द्रचूलः ।।२।।

---

(29) Rāṭhor grant (*I.A.* Vol. XIII, P. 66)
(30) Devali plates of Govinda (*E. I.* XXXV; P. 275)
(31) Jambgaon plates of Indra III, Saka 836 (*E, I.* XXXVI, P. 232)
(32) Dharur plates of Rashṭrakuṭa Govinda III; Saka 728 (*E.I.* XXXVI; P. 290)

* Ed. by Dr. F. Keilhorn in *E. I.* II; P. 217. The date of the inscription is Saka 922 (A. D. 1000)

** The metre is not correct. The preceding verse is also full of errors. So, we have not given the third verse.

CC-0. In Public Domain Sri Aurobindo Library, Pondicherry

d by eGangotri/Sarayu Trust. Funding IKS-MoE-Grant-2 Equipment Heritage Foundation,



# No. 67

## Stone Inscription of Kokkala*.

## ( Khajuraho )

## ( A. D. 1000 )

ॐ नमः शिवाय ॥

शङ्कर—

स्फूर्जत्स्फारफणाकलापविकसद्भीमस्फटाभासुरं
भास्वत्तारतरातिरेकविलसच्चन्द्रार्द्धचिह्नीकृतम् ।
प्रोद्यल्लोलविलोचनानलमिलज्ज्वालावलीपङ्क्तिलं
वन्दे सुंदरवैद्यनाथविधृतं वन्द्यं जटामण्डलम् ॥१॥

यस्य प्रेतवने निवासभवनं भूतैः प्रभुत्वं भृशं
भूतिर्भूषणमङ्गरागरचना प्रीतिर्द्दुगान्तं प्रति ।
कण्ठे तिष्ठति कालकूटमशिवोप्येवं शिवो यः स्थितः
सर्वव्याधिहरश्चराचरधरः पायात्स वः शङ्करः ॥२॥

यं वेदान्तविदो वदन्ति मनसः सङ्कल्पभूतं शिवं
ब्रह्मैकं परमक्षरं तमजरं तं(?)चामरं तद्विदः ।
अधन्ये तं शिवमेव बुद्धममलं त्वन्ये जिन वामनं
तस्मै सर्वमयैक्वकारणपरं शर्वाय नित्यं नमः ॥३॥

माहेन्द्रोपेन्द्ररौद्रज्वरविषममहादुष्टकष्टाभिभूताः
भूतैः प्रत्यग्रभूतैः प्रतिदिनमुदितैर्यातुधानैर्गृहीताः ।
घृष्टांगुष्ठप्रकोष्ठप्रकटितपटिमाटोपकुष्ठप्रदुष्टा
दृष्ट्वा निश्यन्त्यनिष्ठा स्फुटविकटजटाजूटमेते त्वदीयम् ॥४॥

---

* Ed. by Dr, F. Keilhorn in *E. I.* I, PP. 148–149. The date of the inscription is V, S. 1058 (A, D, 1000)

CC-0. In Public Domain Sri Aurobindo Library, Pondicherry

tized by eGangotri/Sarayu Trust. Funding IKS-MoE-Grant-2 Equipment Heritage Foundation, Jalg



# No. 68

## Kharepatan Plates of Raṭṭarāja[1].

( A. D. 1008 )

ॐ नमः शिवाय ॥

शिव—

हेल्लोलालितचण्डदण्डचरणाङ्गुष्ठाग्रभागाहत-
स्वर्गङ्गोद्गतशुक्तिसम्पुटगलन्मुक्ताभृतं ताण्डवे ।
पाणौ वीक्ष्यकपालमाश्वथ जटाचन्द्रामृतोज्जीवितं
कङ्कालं च यदद्भुतं स्मितमवत्वीशान तद्वश्चिरम् ॥

# No. 69

## Kalas-Budrukh Plates of Bhillama III[2].

( A. D. 1025 )

ॐ नमः सर्व्वज्ञाय ॥

चन्द्रशेखर :—

सनातनाङ्गास्त्रिदशानतांह्रयो
हिरण्यगर्भाच्युतचन्द्रमौलयः ।
उत्पत्तिरक्षाप्रलयैकहेतवो
निःशेषविश्वस्य शिवं दिशंतु वः ॥

---

1. Ed. by Dr. F. Keilhorn in *E. I.* III, P. 297. The date of the inscription is Saka year 930 (A.D. 1008)

2. Ed. by J. F. Fleet in *I.A.* Vol. XVII, P. 120. The inscription is dated in Saka 948 (A.D. 1025)

CC-0. In Public Domain Sri Aurobindo Library, Pondicherry

d by eGangotri/Sarayu Trust. Funding IKS-MoE-Grant-2 Equipment Heritage Foundation,



# No. 70

## Bhanpur Plates of Chhittarājadeva[1].
## ( A. D. 1026 )

शिव—

स वः पातु शिवो नित्यं यन्मौलौ भाति जाह्नवी।
सुमेरुशिखरोद्गच्छदच्छचन्द्रकलोपमा ॥[2]

---

1. Ed. by Dr. J F. Fleet in *E. I.* XII, P. 261. The date of the inscription is A. D. 1026.

2. It is also used in a Copper-plate inscription of Mummunirāja (SS. 971) (Vide *E. I.* XXV, PP. 55-56) The first verse invokes Gaṇeśa (Vide Vol. II, Pt. iii, No. 4)

CC-0. In Public Domain Sri Aurobindo Library, Pondicherry

tized by eGangotri/Sarayu Trust. Funding IKS-MoE-Grant-2 Equipment Heritage Foundation, Jalg



# No. 71

## Mayurbhanj Copper-plate Inscription of Narendrabhañjadeva.[1] (A. D. 1029)

भवानीशशिव—

सकलभुवनैकनाथो भवभयभिदुरो भवो[2] भवानीशः।
विविधसमाधिविधिज्ञः सर्व्वज्ञो वः शिवायास्तु ॥[3]

---

1. Ed. by Dr. R. C. Majumdar in *E. I.* XXV, P. 155. The inscription is dated in the Bhauma Samvat 293 (A. D. 1029)

   (N.B. The learned editor wrongly identifies the Samvat with the Harsha Samvat)

2. Read भववो ।

3. The same verse is used in the following inscriptions:—

   (1) Adipur Copper-plate of Narendrabhañjadeva (*E. I.* XXV, PP. 159–160)

   (2) Keśari Copper-plates of Satrubhañjadeva (*E.I.* XXV, P. 162)

   (3) Khaṇḍadeuli (Mayurbhanj) Inscription of Raṇabhañjadeva (*J.B.O.R.S.*, Vol. IV, P. 175)

   (4) Two Bamanghaṭi plates of Raṇabhañjadeva (*Arch. Sur. Mayurbhanj*, Vol. I, PP. 141 & 144)

   (5) Bhañja grant from Khiching (*E.I.* XXX, P. 224)

CC-0. In Public Domain Sri Aurobindo Library, Pondicherry

l by eGangotri/Sarayu Trust. Funding IKS-MoE-Grant-2 Equipment Heritage Foundation,



# No. 72

## Banapur Plates of Indraratha[1]
( Somavaṁśī )
( *Circa* 11th Century A. D. )

शिव—

इन्दोर्जटासुविशदोऽग्निशिखापिशङ्गी
लालाटचक्षुषि गलद्विषमञ्जनाभम् ।
सत्त्वंरजस्तम इति त्रिगुणस्य तस्य
स्थानक्रमं गतवातेऽस्तु नमः शिवाय[2] ॥

---

1. Published by Dr. K. B. Tripathi in the *Jhankara* (Oriya monthly journal), 18th year, 10th number, P. 665. The date of the inscription is about the beginning of the 11th century A. D.

2. This inscription is also published by Dr. K. B. Tripathi in *J.A.S.B.* (*N.S.*)

CC-0. In Public Domain Sri Aurobindo Library, Pondicherry

tized by eGangotri/Sarayu Trust. Funding IKS-MoE-Grant-2 Equipment Heritage Foundation, Jalg



# No. 73

## Bargaon Grant of Ratnapāla*.
## ( The 11th Century A. D )

शङ्कर (शिव)—

द्रष्टेव प्रतिबिम्बकैर्न्नखगतैः स्वैर्न्नृत्यसम्पद्विधेः
सोवश्वीव गतिं शुभां प्रकटयन्दृश्योनिशान्ताण्डवीम् ।
एवं यः परमात्मवत् पृथुगुणो ह्येकोप्यनेकी भवन्
प्राकाम्यन्दधदेव भाति भुवने स स्तात् श्रिये शङ्करः ॥

---

* Ed. in *J. A. S. B.* Vol. LXVII, P. 115. Re-edited by Padmanātha Bhattacharya in the *Kamarapa-śāsanāvalī*, PP. 91-92. Produced in the *History of Assam* by Sir Edward Gate.

The inscription belongs to the 1st half of the 11th Century A. D. It is also used in Soyalkuchi grant of Ratnapāla (*J. A. S. B.* 1898, P. 120)

The second verse of this inscription invokes the Lauhitya–Sindhu (river) (Vide Vol. III, Pt. iv, No. 37)

CC-0. In Public Domain Sri Aurobindo Library, Pondicherry

d by eGangotri/Sarayu Trust. Funding IKS-MoE-Grant-2 Equipment Heritage Foundation,



# No. 74

## A Sanskrit Grant and Inscription.[1]
## W. Chālukya Dynasty.
## ( A. D. 1050 )

ॐ नमो विनायकाय ॥ स्वस्ति जयोभ्युदयश्च ॥

शिव —

बाणं वीणाक्षमाले कमलमहिमथो वीजपूरं त्रिशूलं
खट्वाङ्गं दानहस्ताभयकरसहिताः पाणयो धारयन्तः ।
रक्षन्तु व्यजयन्तः सफलरसमयं देवदेवस्य चित्तं
नोचेदेवं कथं वा त्रिभुवनमखिलं पालितं दानवेभ्यः[2] ॥

---

1. Ed. by H. H. Dhruva in *I.A.* Vol. XII, P. 201. The inscription is dated in Saka 972 (A.D. 1050)

2. It is also used in the Ekallahāra grant of Tribhuvanapāla (A.D. 1050) (*E.I.* XXXV, PP. 15-16)

The second and the third verses of this inscription invoke Hari and Brahman (Vide Vol. I, Pt. I, No. 32 and Vol. III No. 7)

CC-0. In Public Domain Sri Aurobindo Library, Pondicherry

tized by eGangotri/Sarayu Trust. Funding IKS-MoE-Grant-2 Equipment Heritage Foundation, Jalg



# No. 75

## Gauhāṭi Plates of Indrapāla.[1]

## ( The 11th Century A. D. )

शम्भु—

खट्वाङ्गं परशुर्वृषः शशिकलेत्यादि त्वदीयं मया
सर्व्वस्वं जितमद्य-नामकितव-प्रत्यर्पितं ते पुनः।
प्रेष्या केवलमस्तु मे जलवहा गङ्गेति गौरीगिरा
शम्भोर्द्यूतकलाजितस्य जयति व्रीडाविनम्रं शिरः[2] ॥

1. Ed. by Dr. Hornly in *J. A. S. B.* 1897, No. I, P. 113. Re-produced in the *Kāmarapa-śasanāvalī*, P. 117.

   The inscription is assigned to the middle of the 11th century A. D.

2. The same verse is also given in Gayākuchi grant of Indrapāla (*Kāmarapa-śāsanāvalī*, P. 133)

   In this inscription the river Lauhitya (Brahmaputra) is also invoked (Vide Vol. III, Pt. iv, No. 38)

CC-0. In Public Domain Sri Aurobindo Library, Pondicherry

d by eGangotri/Sarayu Trust. Funding IKS-MoE-Grant-2 Equipment Heritage Foundation,



# No. 76

## Fragmentary Inscription from Gayā ( of Viśvarūpa or Viśvāditya, year 5 of Vigrahapāla )[1].

( The 11th Century A. D. )

ॐ नमः शिवाय ॥

शङ्कर—

दयाभाण्डागारं निरवधिजगद्दोषविजयि
स्फुरद्ज्ञानज्योतिःप्रसरनिहतध्वान्तनिचयम् ।
किमप्यन्तःशान्तं सहजसुखपीयूषलहरी
U————Ur[2] हृदयमंघो हरतु वः[3] ॥

1. Ed. by Dr. D. C. Sircar in *E. I.* XXXVI, PP. 89-90. The inscription belongs to about the middle of the 11th century A. D.

2. The word is probably the name of *Saṅkara* or *Gaṅgādhara*.

3. The next verse of this inscription invokes Gayākṣetra (Vide Vol. III, Pt. ii, No. 17)

CC-0. In Public Domain Sri Aurobindo Library, Pondicherry

tized by eGangotri/Sarayu Trust. Funding IKS-MoE-Grant-2 Equipment Heritage Foundation, Jalg



# No. 77

## Mandhata Plates of Jayasimha of Dhārā[1].

## (A. D. 1055)

शिव—

जयति व्योमकेशोसौ यस्सर्गाय विभर्त्तिताम् ।
ऐन्दवीं शिरसा लेखां जगद्वीजांकुराकृतिम् ॥
तन्वन्तु वो स्मराराते: कल्याणमनिशं जटा: ।
कल्पान्तसमयोद्दामतडिद्वलयपिङ्गला:[2] ॥

---

1. Ed. by Dr. F. Keilhorn in *E. I.* III, P. 48. The date of the inscription is V.S. 1112 (A. D. 1055)

2. The same verse is also given in the following inscriptions :—
   (1) Banswara plates of Bhojadeva (V.S. 1076 or A. D. 1020) (*I.A.* XLI, P. 201) & (*E.I.* XI, P. 182)
   (2) Betma plates of Bhojadeva (V.S. 1076) (*E, I.* XVIII, P. 322)
   (3) The Kadambapadraka grant of Naravarman (V.S. 1167) (*E. I.* XX, P. 106)
   (4) Shergadh Inscription of the Paramāra Udayāditya (*E.I.* XXIII, P. 135)
   (5) Bhopal plates of Mahākumāra Harichandradeva (*E. I.* XXIV, P. 232)
   (6) Mahudi plates of Paramāra Bhoja (V.S. 1074) (*E. I.* XXXIII, P. 217)
   (7) Malwā Inscription of Bhoja (*I.A.* Vol. VI, P. 53)
   (8) Bhopal plates of Udayavarman (A. D. 1200) (*I.A.* Vol. XI, P. 25)
   (9) Grant of Jayapāla (V.S. 1231) (*I.A.* Vol. XVIII, P. 82)

CC-0. In Public Domain Sri Aurobindo Library, Pondicherry

l by eGangotri/Sarayu Trust. Funding IKS-MoE-Grant-2 Equipment Heritage Foundation,



# No. 78

## Bankapur Inscription of Somesvara I*.
## ( A. D. 1055 )

शिव—

प्रत्यत्तवस्तुविषयाय जगद्धिताय
विश्वस्थितिप्रलयसम्भवकारणाय ।
सर्व्वात्मने विजितकोपमनोभवाय
तुभ्यं नमः स्वभुवनप्रभवे शिवाय ॥

---

**(10) Copper-plate grant of Jayavarmadeva**
**(*I.A.* Vol. XIX, PP. 350 and 352)**

**(11) Indore Museum plates of Bhojadeva**
**(V.S. 1079 or A.D. 1022) (*I.H.Q.* Vol. VIII, P. 311)**

*** Ed. by Lionel D. Barnett in *E.I.* XIII, P. 170. The date of the inscription is in Saka 977 (A.D. 1055)**

CC-0. In Public Domain Sri Aurobindo Library, Pondicherry

tized by eGangotri/Sarayu Trust. Funding IKS-MoE-Grant-2 Equipment Heritage Foundation, Jalg



# No. 79

## Panahera Inscription of the time of Jayasimhadeva of Malwa[1].

## ( A. D. 1059 )

ॐ नमः शिवाय ॥

महादेव—

धृतगगनसिंधुपट्टः शैलसुताशालभंजिकासुभगः ।
जयति जगत्त्रयमण्डपमूलस्तम्भो महादेवः[2] ॥१॥

---

1. Ed. by R. R. Haldar, Ajmer, in *E.I.* XXI, P 44. The date of the inscription is V. S. 1116 (A. D. 1059)

2. After this, there are a few more verses, relating to Hara and Hari, which have not been read owing to obliteration. The fragmentary *pādas* of the next two verses, referring to Siva, are given below :—

—U—UU—U शांककलया सद्यः प्रपद्यामृतं
वामः प्राप्य सुरां जगाम गरलप्रासादघोरः सुखं ।
ईशानेन समुद्रमन्थनविधौ नेत्रीकृतः पन्नगो
———UU—U—UUU———U——U तै ॥२॥

द्धूमैर्म्मसलिताः पुनश्च दलिताश्चूडेन्दुलेखांशुभिः ।
भूयः स्फारभुजगभोगगरलश्वासोर्म्मिभिः संभृताः ।
शंभोः पातु कठोरकंठ UU———U———U— ॥३॥

CC-0. In Public Domain Sri Aurobindo Library, Pondicherry

l by eGangotri/Sarayu Trust. Funding IKS-MoE-Grant-2 Equipment Heritage Foundation,



# No. 80

## Halāyudha-stotra from the Amareśvara Temple*
## ( at Māndhātā on the bank of the Narmadā )
## ( A. D. 1063 )

ॐ नमः शिवाय ॥

महाकाल (शिव) :—

एको देवः स जयति शिवः केवलज्ञानमूर्त्ति-
र्देवी सा च त्रिभुवनमिदं यद्विभूतिप्रपञ्चः ।
यत्कूटस्थं मिथुनमविनाभावसम्बन्धयोगा-
न्मिश्रीभूतं तदखिलजगज्जन्मवीजं नमामि ॥१॥

एकः स्रष्टा सकलजगतामादिभूतः स्वयंभू-
स्राता तेषां त्रिभुवनगुरुर्वासुदेवः प्रसिद्धः ।
यस्तौ द्वावप्यतुलमहिमा संहरत्यन्तकाले
कस्तस्यान्यो भवति सदृशः श्रीमहाकालमूर्त्तेः ॥२॥

वक्तुं वाञ्छां हर निरवधि त्वन्महिम्नः स्वरूपं
चेतश्चैतत्कतिपयपदज्ञानमात्रावसन्नम् ।
ज्ञात्वैवेदं त्रिनयन मया त्वद्गुणस्तोत्रभक्त्या
स्वात्मन्येव स्वयमपि कृतो धृष्टतापट्टवन्धः ॥३॥

वागीशस्त्वं युगपदखिलज्ञानसम्पत्तियुक्तः
का ते तुष्टिः स्तुतिरचनया मादृशस्याल्पशक्तेः ।

---

* Ed. by P. P. Subrahmanya Sastri, in *E. I.* XXV, PP. 175-182. The date of the inscription is V. S. 1120 (A. D. 1063)

CC-0. In Public Domain Sri Aurobindo Library, Pondicherry

tized by eGangotri/Sarayu Trust. Funding IKS-MoE-Grant-2 Equipment Heritage Foundation, Jalg



एवं ज्ञात्वा हर विरमति स्तोत्रहेतौ हठान्मे
भक्त्यावेशात्प्रसरति मुखाद्भारती किं करोमि ॥४॥

यत्ते तत्वं निरुपधि परं वाङ्मनःपारभूतं
ब्रह्मादीनामपि हर गिरस्तत्र भग्नाः प्रवेष्टुम् ।
अर्वाचीनं यदपरमिदं पार्वतीवल्लभन्ते
रूपं भक्त्या वरद तदहं वाग्भिरभ्यर्च्चयामि ॥५॥

अन्यैः स्तोत्रं रचितममृतस्यन्दिभिर्वाग्विलासैः
फल्गुप्रायैः किमिदमियता त्यज्यते मद्वचोभिः ।
किंवा कैश्चित्कनककमलैरर्चितं पादपीठं
भक्त्या शंभो न पुनरपरः पूजयत्यर्क्कपुष्पैः ॥६॥

पथ्याहारौ हर जलमचां यौ च यौ पङ्कजानां
मित्रामित्रौ वरद द्विविधां दाहकग्राहकौ यौ ।
यौ गन्धस्य प्रजनवहनौ तानहं तुष्टिहेतो-
रष्टौ वन्दे त्रिभुवनगुरोर्मूर्त्तिभेदांस्तवैतान् ॥७॥

संसारेस्मिनध्रुवमसुलभं मानुषं जन्म लब्ध्वा
युष्मानेको भजति सुकृती कश्चिदन्यं च देवम् ।
आरूढोऽपि स्मरहर गिरिं रोहणं भाग्ययोगा-
देको रत्नं कलयति महत्काचमन्यश्च फल्गु ॥८॥

ये त्वामर्हन्सुगत इति वा भक्तियोगाद्भजन्ते
तेभ्यः शम्भो फलमभिमतं त्वं ददासीति युक्तम् ।
अध्वक्लान्तैः स्वरुचिरुचिरं नाम किञ्चिद्गृहीत्वा
शीतं पीतं जलमिह जनैः किं न तृप्तिं करोति ॥९॥

आदित्यादिग्रहपरिकरो याति चायाति नित्यं
कालश्चायं दिवसरजनीपक्षमासर्तुचिह्नः ।

l by eGangotri/Sarayu Trust. Funding IKS-MoE-Grant-2 Equipment Heritage Foundation,



एतत्सर्व्वं ननु न घटते प्रेरकत्वं विना ते
कार्ये चास्मिन्न पुनरपरस्यास्ति सामर्थ्यमेतत् ॥१०॥

तस्यागारे गिरिश रमते धेनुवत्कामधेनुः
क्रीड़ावाटे विटपिसदृशः कल्पते कल्पवृक्षः ।
लाक्षारत्नामणिरिव करे तस्य चिन्तामणिः स्या-
द्यस्मिन् सिद्धः सकृदपि कृपादृष्टिपातप्रसादः ॥११॥

मौलौ लोलत्रिदशतटिनीतोयशीतेमृतांशुं
कण्ठे क्रूरं कवलितविषश्यामले व्यालराजम् ।
ज्योत्स्नागौरे वपुषि विशदं बिभ्रतो भस्मरागं
ज्ञात्वा सम्यक्त्रिनयन मया योगभूषा तवैव ॥१२॥

धत्ते शोभां घुसृणतिलकस्पर्धि चक्षुर्ललाटे
मौलौ लग्ना त्रिदशतटिनी मालिनीमालिकेव ।
क्ष्वेड़ं क्रीड़ामृगमदमयी पत्रलेखेव कण्ठे
श्लाघ्यः शम्भो स्फुरति सहजः कोपि भूषाविधिस्ते ॥१३॥

दग्धं येन त्रिभुवनमिदं देव दुर्व्वारधाम्ना
दग्धः सोपि त्रिनयन भवद्दृष्टिपातेन कामः ।
युक्तं चैतद्भवति पुरुषो यः परस्योपतापी
तस्यावश्यं पतति शिरसि क्रोधदण्डः प्रभूणाम् ॥१४॥

कस्य क्षेमो भवति वलिना स्पर्धमानस्य सार्धं
यस्त्वत्कोपात्त्रिनयन भवच्चक्षुषा वञ्चितोभूत् ।
प्रेम्णा दष्टेऽधरकिसलये दृष्टवान् यः स गामी
लीलानृत्यचतुरवनिताभ्रूलताप्रेक्षणानि ॥१५॥

ये दारिद्र्योपहतवपुषो ये च दौर्भाग्यदग्धा
ये वा शत्रुव्यसनविकला ये च मौर्ख्योपतप्ताः ।

CC-0. In Public Domain Sri Aurobindo Library, Pondicherry

tized by eGangotri/Sarayu Trust. Funding IKS-MoE-Grant-2 Equipment Heritage Foundation, Jalg



ये वा कैश्चित् त्रिनयन दृढं पीडिता दुःखशोकैः-
स्तेषामेकस्त्वमसि शरणं तर्षितानामिवाम्भः ॥१६॥

श्लाघ्यं जन्म श्रुतिपरिणतिः सत्क्रियायां प्रवृत्तिः
प्रौढिः शास्त्रे ललितमधुरा संस्कृता भारती च ।
स्फीता लक्ष्मीर्वपुरपि दृढं चन्द्रलेखाङ्कमौले
युष्मत्सेवापदविरहितं सर्वमेतत्पलालम् ॥१७॥

त्वत्पूजायां कुसुमहरणे धावतः पादयुग्मं
यत्पाषाणव्रजपरिकरोत्कीर्णरेखाङ्कमासीत् ।
यत्तस्यैव त्वदनु चरतो रुद्रलोकं गतस्य
ब्रह्मादीनां मुकुटकिरणश्रेणयः शोणयन्ति ॥१८॥

येषां युष्मत् प्रतिकृतिगृहं लिम्पतां पाणयो ये
त्वद्भक्तानां सलिललुलितैर्गोमयैः संप्रलिप्ताः ।
तेषामीश त्रिदशनगरीनायकत्वं गतानां
ते लिप्यन्ते मृगमदरसैः खेचरीणां कुचेषु ॥१९॥

यस्ते कृत्वा स्नपनममृतैः पञ्चभिश्चन्द्रमौले
पश्चात्कैश्चित्कुसुमनिकरैर्मूर्ध्नि बध्नाति मालाम् ।
तस्यावश्यं सकलभुवनैकाधिपत्याभिषिक्ते
बध्नन्त्यन्ये शिरसि परमैश्वर्यसाम्राज्यपट्टम् ॥२०॥

एतच्चित्रं क्वचिदपि मया नैव दृष्टं श्रुतं वा
तद्विस्पष्टं कथय किमिदन्नाथ कौतूहलं मे ।
यत्ते भक्त्या हर चरणयोरर्पितं पुष्पमेकं
सद्यः सूते फलमभिमतं कोटिशः कामरूपम् ॥२१॥

यस्ते भक्त्या वरदचरणद्वंद्वमुद्दिश्य दद्या-
देकं नीलोत्पलदलमपि त्वत्प्रसादेन नूनम् ।

CC-0. In Public Domain Sri Aurobindo Library, Pondicherry

d by eGangotri/Sarayu Trust. Funding IKS-MoE-Grant-2 Equipment Heritage Foundation,



तत्प्रत्यंतः निपतति पुनर्दृष्टिरालोलतारै-
र्दिव्यस्त्रीणां कुवलयदलश्रेणिदीर्घैः कटाक्षैः ॥२२॥

कृत्वा मालां घनपरिमलाद्वारिधाराकदम्बै-
र्यस्ते कण्ठाभरणपदवीं प्रापयेन्नीलकण्ठ ।
दिव्यस्त्रीणां विपुलपुलकैर्बाहुभिः कण्ठलग्नै-
स्तस्यापि त्वं वितरसि चिरं निर्भराश्लेषसौख्यम् ॥२३॥

कृत्वा पूजां तव चरणयोरादराष्टमूर्ते
यः साष्टाङ्गं प्रणमति महीपृष्ठपीठे लुठित्वा ।
प्रत्यासन्नं क्षितिपतिपदं प्रीतिवद्धानुरागा
तस्योत्सङ्गे लुठति धरणी रेणुचक्रच्छलेन ॥२४॥

त्वामुद्दिश्य त्रिनयन जनो यः प्रदीपं ददाति
ज्योतिर्ज्वालादलिततिमिरं द्योतितान्तर्निकेतम् ।
तस्मै मायारजनिविलसद्गाढमोहान्धकार-
च्छेदप्रौढं त्वमपि दिशसि ज्ञानमात्मप्रकाशम् ॥२५॥

चित्रैर्माल्यैरचितकुसुमैर्धूर्जटे पूजयित्वा
यः स्तौति त्वां जय जय महादेव देवेति वाचा ।
सोप्यारोहन् हर तव पुरं मौलिवद्धाञ्जलीनां
शक्रादीनां स्तुतिविषयतां त्वत्प्रसादात्प्रयाति ॥२६॥

भस्मस्नानं वहसि शिरसा स्वर्धुनीवारिभारं
शान्तां मूर्त्तिं कलयसि करे कार्म्मुकं युक्तमेतत ।
अप्यन्येषां कतिपयपुरस्वामिनां चित्रभूता-
श्चेष्टा दृष्टास्त्रिभुवनपतेः किं महेशस्य न स्युः ॥२७॥

त्वामाराध्य त्रिदशपतयो भुञ्जते राजलक्ष्मीं
भिक्षाभुक्त्वं त्वदपि च महादेवशब्दैकवाच्यः ।

CC-0. In Public Domain Sri Aurobindo Library, Pondicherry

tized by eGangotri/Sarayu Trust. Funding IKS-MoE-Grant-2 Equipment Heritage Foundation, Jalg



नैराशिष्यं वरदपरमैश्वर्यकोटिप्रतिष्ठं
तच्चेदस्ति त्वयि किमपरैः फल्गुभिः श्रीविलासैः ॥२८॥

अस्थिग्रन्थिः पितृवनभवं भस्मभूषाङ्गरागः
प्रीतिः प्रेतैस्तव सहचराः फेरवाः कोत्रदोषः ।
यस्यैश्वर्यं परमपदवीं प्राप्य विश्रान्तमुच्चै-
स्तस्य ग्रावा कनकमथवा सर्वमेतत् समानम् ॥२९॥

आवासस्ते पितृवनमहिः क्रीडनं यानमुक्षा
भिक्षापात्रं हर नरशिरः कर्प्परं नैष दोषः ।
आरातीयस्त्रिनयन भवस्त्वल्पसंस्थो हि लोको
निस्त्रैगुण्ये पथि विचरतां को विधिः को निषेधः ॥३०॥

प्रेतावासः शयनमशनं भैक्षमाशाश्च वासः
खट्वाङ्गं च ध्वजमुपहितं त्वस्थि नेपथ्यशङ्के ।
यद्यप्येवं तदपि भगवन्नीश्वरेत्यस्य नाम्नो
निःसामान्यस्त्वमपि विषयो नापरः कश्चिदस्ति ॥३१॥

दारुद्याने द्विजवरवधूपल्लवो रेतसाग्नौ
होमः सन्ध्यानटनमिति ते चेष्टितं नैव दुष्टम् ।
मिथ्याज्ञानोपहतमनसां मार्गमुल्लंघ्य दूरं
ये निष्क्रान्तास्त्रिनयन न तान् लोकवादाः स्पृशन्ति ॥३२॥

देवाः सर्व्वे वदति वपुषा भूषणं हेमरत्नं-
गुञ्जामात्रं कनकमपि ते नास्ति कर्णे करे वा ।
मार्गातीतं स्फुरति सहजं यस्य सौन्दर्यमङ्गे
तस्याहार्येष्वितरजनवन्नादरः स्याद्गुणेषु ॥३३॥

त्वं ब्रह्मादित्रिदशगुरुभिः पूजितः स्वार्थहेतो-
रित्याम्नायो न खलु भवता प्रार्थितः कश्चिदन्यः ।

CC-0. In Public Domain Sri Aurobindo Library, Pondicherry

d by eGangotri/Sarayu Trust. Funding IKS-MoE-Grant-2 Equipment Heritage Foundation,



इच्छामात्रास्त्वयमुपनमन्त्यग्रतो यस्य भावा-
स्तस्यापेक्षा कथमपि भवेदीश्वरस्येतरेषु ॥३४॥

खण्डश्चन्द्रः शिरसि परशुः खण्डमेवायुधान्ते
भिक्षापात्रं द्रुहिणशिरसः खण्डमेकं कपालम् ।
खण्डप्रायस्तव परिकरो यद्यपीत्थन्तथापि
त्वं सर्व्वेषां स्मृतिमुपगतः सर्व्वपूर्णत्वहेतुः ॥३५॥

पृथ्वीपीठे कृतपदमदः स्वच्छमाकाशलिङ्गं
तारापुष्पैः शिरसि रचिताभ्यर्चनं चन्द्रचूड ।
इत्थं भावादवहितधियो ये भवन्तं भजन्ते
ते लीयन्ते त्वयि जलनिधौ निम्नगानामिवौघाः ॥३६॥

वाराणस्यां स्फुरति यदिदं देवदेवाविमुक्तं
क्षेत्रं ज्योतिः सकलभुवनालोकनादर्शभूतम् ।
कृत्वा तस्मिन्प्रमहसि पदे क्षेत्रसंन्यासयोगं
त्वय्येकत्वं व्रजति पुरुषस्तेजसीव प्रदीपः ॥३७॥

यत्प्रत्यक्षं सकलभुवनाश्चर्यभूतं विभाति
ज्योतिर्लिङ्गं कनककपिशं श्रीगिरौ व्योम्नि दिव्यम् ।
तत्पश्यन्तः शिव सुकृतिनस्त्यक्तसंसारबन्धा-
स्त्वत्कारुण्याद्विरगणपदप्राप्तिभाजो भवन्ति ॥३८॥

वाचाधीशं हुतवहतनुं शक्तिपाणिं भवन्तं
ये ध्यायन्ति त्रिनयन मनस्तेजसा निर्दहन्तम् ।
गङ्गास्रोतःसदृशविलसद्गद्यपद्यप्रवाहैः
सद्यस्तेषां प्रसरति मुखाद्भारती नात्र चित्रम् ॥३९॥

भास्वज्ज्योतिः किरणमरुणं दक्षिणेऽदक्षिणे स्थितं त्वां
ये वीक्षन्ते पुरुषमुदितं ध्यातमादित्यमूर्त्तिम् ।

CC-0. In Public Domain Sri Aurobindo Library, Pondicherry

tized by eGangotri/Sarayu Trust. Funding IKS-MoE-Grant-2 Equipment Heritage Foundation, Jalg



ते सर्वत्राप्रतिहतदृशः सूर्यपर्यन्तलोकं
पश्यंत्यग्रे करतललुठत्कंदुकस्पष्टरूपम् ॥४०॥

ये ध्यायन्ति स्वहृदि विमलं चत्त्वमात्मैकरूपं
विश्वादर्शं प्रसरदभितो भूर्भुवःस्वस्त्रिलोकीम् ।
इत्थं गत्यागतिपरिचयात्ते तवैव प्रसादा-
त्सर्वज्ञत्वं हर विकरणीं शीलयन्तो लभन्ते ॥४१॥

ये त्वां शंभो हृदयभवनांभीरुहाभ्यन्तरस्थं
ज्ञानज्योतिस्तदुपधिवशाद्व्रीहिशूकाग्रसूक्ष्मम् ।
उद्वीक्षन्ते दृढतरतयं तेष्युपाधिप्रणाशा-
त्त्वय्येकत्वं नभसि कलशाकाशवन्निर्विशन्ति ॥४२॥

अर्चिर्विद्युत्प्रभृतिभिरजं मार्गविश्रामलोकै-
र्ये गच्छन्ति त्रिनयनपथा देवयानेन केचित् ।
भुक्त्वा भोगाननुपमरसान स्वेच्छया ब्रह्मलोके
ते तस्यान्ते पुनरपि शिव त्वन्मयत्वं भजन्ते ॥४३॥

यत्रानन्दः स्फुरति परमज्योतिरालोकजन्मा
भुज्यन्ते च स्वयमुपनता यत्र दिव्याश्च भोगाः ।
यत्रावृत्तिर्न भवति पुनः पञ्चमाध्वप्रसिद्धं
तद्वैराजं पदमपि शिव प्राप्यते त्वत्प्रसादात् ॥४४

त्वय्यात्मानं निहितमखिलैस्त्वद्गुणैः संप्रयुक्तं
स्वच्छादर्शे मुखमिव चिरं चेतसि निश्चलेन ।
ये पश्यन्ति त्रिनयन मनोवाञ्छितार्थप्रसूति-
स्तेषामाविर्भवति सुधियामेव धर्मः समाधिः ॥४५।

ज्ञानज्योतिः सकलजगतां स्वप्रकाशस्वरूपं
त्वामात्मानं परिहितगुणस्पर्शमीशानमीले ।

CC-0. In Public Domain Sri Aurobindo Library, Pondicherry

d by eGangotri/Sarayu Trust. Funding IKS-MoE-Grant-2 Equipment Heritage Foundation,



यत्रैकस्मिन्नवहितधियां योगदृष्टिस्थितानां
स्वच्छादर्शे प्रतिफलितवद् विश्वमेतच्चकास्ति ॥४६॥

भूतं भूतस्मरणविषयं भावि नान्यत्र काले
सूक्ष्मं मध्यं क्षणमिह तयोर्वर्त्तमानं वदन्ति ।
तस्मिन्सौख्यं कियदमतयो येन मत्ता मनुष्या
युष्मत्सेवां भव भवभयध्वंसिनीं नाद्रियन्ते ॥४७॥

ज्ञानं न स्यात्क्वचिदपि किल ज्ञेयसंबन्धशून्यं
ज्ञेयं सत्तामपि न लभते ज्ञानबाह्यं कदाचित् ।
इत्यन्योन्यग्रथितमुभयोऽर्याथिकं यत्स्वरूपं
तत्ते प्राहुः प्रकृतिपुरुषस्यार्द्धनारीश्वरत्वम् ॥४८॥

यत्प्रत्यक्षं न भवति नृणामिन्द्रियाणामशक्ते-
र्यत्संबन्धग्रहणविरहान्नानुमेयं च किंचित् ।
शब्दादीनामपि न विषयं यत्परोक्षस्वरूपं
ज्ञानज्योतिर्यदिह परमं सत्त्वमध्यात्ममूर्त्तिः ॥४९॥

त्वामात्मानं वरद परमानन्दबोधस्वरूपं
ये बुध्यन्ते विगलितजगद्भेदमायाप्रपञ्चम् ।
रागत्यागात् स्तिमितमनसो देव जीवन्त एव
ध्वस्यन्मायानिविड़निगड़ग्रन्थयस्ते विमुक्ताः ॥५०॥

श्लाघ्यं यत्तत्कृपणमनसां सप्तलोकाधिपत्यं
या मृग्यंते तरलमतिभिः सिद्धयश्चाणिमाद्याः ।
एतत्सर्व्वं मदनदहन त्वत्पदप्राप्तिभाजां
तत्त्वज्ञानामृतरसजुषां योगिनामन्तरायः ॥५१॥

आशावासः शयनमवनिं ब्रह्मचर्यं च दीर्घं
मौनं दण्डग्रहणमशनं भिक्षया भस्मशौचम् ।

CC-0. In Public Domain Sri Aurobindo Library, Pondicherry

tized by eGangotri/Sarayu Trust. Funding IKS-MoE-Grant-2 Equipment Heritage Foundation, Jalg



वैराग्यञ्च त्रिनयन भव तत्त्वबोधाद्विहीनं
मूलादेवं ध्रुवमलवणं सर्व्वमेतद्विभाति ॥५२॥

स्थित्वाकालं चिरतरमपि ब्रह्मशक्रादिलोके
कर्म्मच्छेदात्पुनरपि ततः स्यादवश्यं निपातः ।
एकं नित्यं पदमुपगतः क्लेशकर्म्माम्भिपाकं
शैवं ज्योतिर्यदिह सुलभं ज्ञानयोगेन पुंसाम् ॥५३॥

शक्रदीनां क्रतुफलजुषां यस्सुखं नाकलोके
तत्कीटादेर्न्नरकनिलयस्यापि तुल्यं विभाति ।
येनैकान्तं न भवति सुखं कस्यचिन्नापि दुःखं
द्वंद्वग्रस्तं त्रिभुवनमिदं त्वं तु तस्माद्विमुक्तः ॥५४॥

बन्धच्छेदाहिह तनुभृतां त्वत्वया साकमैक्यं
सा चेन्मुक्तिः शिव किमनया यातु यद्वान्धकूपम् ।
त्वं मे स्वामी भवदनुचरः शर्व्व यत्सर्व्वदाहं
तद्धि श्लाघ्यं स्वपतिपदवीं कामयन्ते न भृत्याः ॥५५॥

वातोद्धूतस्फुटपुटकिनीपत्रतोयोपमाने
को विश्वासं व्रजति चपले जन्मिनो जीवितेस्मिन् ।
कान्ताश्रीणां प्रियसहचरैर्न्निर्भराालिङ्गितं मे
चेतः शम्भो स्वपति न यथा तत्प्रसादं कुरुष्व ॥५६॥

स्वन्नेत्राग्नि व्यतिकरमिव प्राक्तनं पुष्पचापः
स्मृत्वा नूनं व्यवसितमतिर्व्वैरनिर्यातनाय ।
यत्संसक्तं तव चरणयोर्देव सेवानुरागा-
त्तन्मे चेतः प्रहरति शरैस्त्यक्त तद्रक्ष यत्नात् ॥५७॥

भिक्षापात्रं मृगजमजिनं जीर्णकौपीनमेकं
कंथा रथ्यानिपतितजरच्चीरलेशैश्च लघ्वी ।

CC-0. In Public Domain Sri Aurobindo Library, Pondicherry

d by eGangotri/Sarayu Trust. Funding IKS-MoE-Grant-2 Equipment Heritage Foundation,



एतावान्मे हर परिकरस्त्वत्प्रसादेन नित्यं
भूयाद्भूयस्तव चरणयोर्भूयसी भक्तिरेका ॥५८॥

देवस्तादङ्कवति भगवन्भर्गसर्गस्य सार-
स्तस्मात्पूर्वं महदिति पदं प्रोक्तमुत्कर्षमाह ।
